शीलत्वाभिधानात् कथं पृथगुपादनम्। न आचर्य्यानुष्ठानलक्षणक्रियारूपत्वादाचारस्य स्वरूपविशेषत्वाच्छीलस्य व्यक्त एव भेदः। "शुचौ तु चरिते शीलमिति" शीलस्य चरितविशेषहेतुत्वादुपचारेण चरितत्वाभिधानम्। अथ शीलं कस्य धर्मतां प्रमापयति। आत्मन एव पुरुषविशेषस्वभावोऽन्यथानुपपद्यमानः स्वस्य श्रेयःसाधनतां बोधयति। तथा च ब्राह्मणतेत्यादिहारीतवचने भावप्रत्ययान्ततयाभिधानं शीलस्य क्रियाव्यतिरेकितां बोधयत् स्वभावतामेव ज्ञापयति यदाह हारीतः "ब्राह्मणता१ देवपितृभक्तता२ सौम्यता३ अपरोपतापिता४ अनसूयता५ मृदुता६ अपारुष्यं७ मित्रता८ प्रियवादित्वम्९ कारुण्यं१० कृतज्ञता११ शरण्यता१२ प्रशान्तिः१३ चेति त्रयोदशविधं शीलम्"। आचारो विवाहादौ कङ्कणबन्धनाद्यनुष्ठानम्। आत्मतुष्टिरत्र धर्मसन्देहे वैदिकसंस्कारवासितान्तःकरणानां साधूनामेकत्र पक्षे मनःपरितोषः। याज्ञवल्क्यः "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्। पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानाम् धर्मस्य च चतुर्दश"।

**धर्ममेघ** पु० धर्मान् मेहति वर्षति मिह—अच् घश्चान्तादेशः ६त०। पातञ्जलोक्ते असंप्रज्ञातसमाधौ। तल्लक्षणादि पात० सूत्रभाष्यविवृतिषूक्तं यथा "प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः" सू०।

"यदायं ब्राह्मणः प्रसंख्यानेऽप्यकुसीदस्ततोऽपि न किञ्चित् प्रार्थयते तत्रापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवतीति संस्कारबीजक्षयान्नास्य प्रत्ययान्तराण्युत्पद्यन्ते तदास्य धर्ममेघोनाम समाधिर्भवति" भा०

"ततः प्रसंख्यानादकिञ्चित् सर्वभावाधिष्ठातृत्वादि प्रार्थयते प्रत्युत तत्रापि क्लिश्नाति परिणामित्वदोषदर्शनेन विरक्तः सर्वथा विवेकख्यातेरेव भवति एतदेव विवृणोति तत्रापीति यदा व्युत्थानप्रत्यया भवेयुः तदा नायं ब्राह्मणः सर्वथा विवेकख्यातिः यतस्तस्य प्रत्ययान्तराणि न भवन्ति ततः सर्वथा यदा विवेकख्यातिरिति तदास्य धर्ममेघः समाधिर्भवति। एतदुक्तं भवति प्रसंख्याने विरक्तस्तन्निरोधमिच्छन् धर्ममेघं समाधिमुपासीत तदुपासने च सर्वथा विवेकख्यातिर्भवति" विवृतिः।

"ततः क्लेशकर्मनिवृत्तिः" सू०।

"तल्लाभादविद्यादयः क्लेशाः समूलकाषं कषिता भवन्ति कुशलाकुशलाश्च कर्माशयाः समूलघातं हता भवन्ति क्लेशकर्मनिवृत्तौ जीवन्नेव विद्वान् विमुक्तो भवति कस्मात् यस्माद्विपर्ययो भवस्य कारणं, न हि क्षीणविपर्ययः कश्चित् केनचित् क्वचिज्जातो दृश्यते इति" भा०।

"तन्निरोद्धुं पारयतीति तस्य च प्रयोजनमाह। ततः। कस्मात् पुनर्जीवन्नेव विद्वान् विमुक्तोभवति उत्तरं यस्मादिति क्लेशकर्मवासनेद्धः किल कर्माशयो जात्यादिनिदानं, न चासति निदाने निदानी भवितुमर्हतीति यथाहात्र भगवानक्षपादः "वीतरागजन्मादर्शनादिति" विवृतिः।

"तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्यात् ज्ञेयमल्पम्।" सू०

"सर्वैः क्लेशकर्मावरणैर्विमुक्तस्य ज्ञानस्यानन्त्यं भवति तमसाभिभूतमावृतं ज्ञानसत्त्वं क्वचिदेव रजसा प्रवर्त्तितम् उद्घाटितं ग्रहणसमर्थं भवति तत्र यदा सर्वैरावरणमलैरपगतमलं भवति तदा भवत्यस्यानन्त्यं ज्ञानस्यानन्त्यात् ज्ञेयमल्पं सम्पद्यते यथाकाशे खद्योतः, यत्रेदमुक्तम् 'अन्धो मणिमविध्यत्तमनङ्गुलिरावयत्। अग्रीवस्तं प्रत्यमुञ्चत्तमजिह्वोऽभ्यपूजयदिति" भा०।

"अथैवं धर्ममेघे सति कीदृशं चित्तमित्याह। तदेति आव्रियते चित्तसत्त्वमेभिरिति आवरणानि मलाः क्लेशकर्माणि सर्वे च ते आवरणमलाश्चेति सर्वावरणमलाः तेभ्योऽपेतस्य ज्ञानस्य चित्तसत्त्वस्य ज्ञायतेऽनेनेति अनया व्युत्पत्त्या, आनन्त्यादपरिमेयत्वात् ज्ञेयमल्पम्। यथा हि शरदि घनपटलमुक्तस्य चन्द्रार्चिषः परितः प्रद्योतमानस्य प्रकाशानन्त्यात् प्रकाश्याः घटादयोऽल्पाः प्रकाशन्ते एवमपगतरजस्तमसश्चित्तसत्त्वस्य प्रकाशानन्त्यादल्पं प्रकाश्यमिति तदेतदाह सर्वैरिति एतदेव व्यतिरेकमुखेन स्फोरयति आवरकेण तमसाभिभूतमिति क्रियाशीलेन रजसा प्रवर्त्तितमत एवोद्घाटितं तमइत्यर्थः। अतएव सर्वान् धर्मान् ज्ञेयान् मेहति वर्षति प्रकाशनेनेति धर्ममेघ इत्युच्यते। नन्वयमस्तु धर्ममेघः समाधिः सवासनक्लेशकर्माशयप्रशमहेतुः अथ सत्यप्यस्मिन् कस्मात् न जायते पुनर्जन्तुः इत्यत आह। यत्रेदमुक्तमिति कारणसमुच्छेदेऽपि चेत् कार्यं क्रियते हन्त भोः मणिवेधादयोऽन्धादिभ्यो भवेयुः प्रत्यक्षाः, तथा चानुपपन्नार्थतायामाभाणको लौकिक उपपन्नार्थः स्यात्। अविध्यदन्धो मणिमिति आवयत् ग्रथितवान्, प्रत्य-